॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय २७

तथागतां तां व्यथितामनिन्दितां
व्यपेतहर्षां परिदीनमानसाम् ।
शुभां निमित्तानि शुभानि भेजिरे
नरं श्रिया जुष्टमिवोपजीविनः ॥ १॥

तस्याः शुभं वाममरालपक्ष्म
राजीवृतं कृष्णविशालशुक्लम् ।
प्रास्पन्दतैकं नयनं सुकेश्या
मीनाहतं पद्ममिवाभिताम्रम् ॥ २॥

भुजश्च चार्वञ्चितपीनवृत्तः
परार्ध्य कालागुरुचन्दनार्हः ।
अनुत्तमेनाध्युषितः प्रियेण
चिरेण वामः समवेपताशु ॥ ३॥

गजेन्द्रहस्तप्रतिमश्च पीनस्
तयोर्द्वयोः संहतयोः सुजातः ।
प्रस्पन्दमानः पुनरूरुरस्या
रामं पुरस्तात्स्थितमाचचक्षे ॥ ४॥

शुभं पुनर्हेमसमानवर्णम्
ईषद्रजोध्वस्तमिवामलाक्ष्याः ।
वासः स्थितायाः शिखराग्रदन्त्याः
किं चित्परिस्रंसत चारुगात्र्याः ॥ ५॥

एतैर्निमित्तैरपरैश्च सुभ्रूः
सम्बोधिता प्रागपि साधुसिद्धैः ।
वातातपक्रान्तमिव प्रनष्टं
वर्षेण बीजं प्रतिसञ्जहर्ष ॥ ६॥

तस्याः पुनर्बिम्बफलोपमौष्ठं
स्वक्षिभ्रुकेशान्तमरालपक्ष्म ।
वक्त्रं बभासे सितशुक्लदंष्ट्रं
राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥ ७॥

सा वीतशोका व्यपनीततन्द्री
शान्तज्वरा हर्षविबुद्धसत्त्वा ।
अशोभतार्या वदनेन शुक्ले
शीतान्शुना रात्रिरिवोदितेन ॥ ८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com